ज्वलनेन तु तापयेत् । विप्राणां मन्त्रघोषेण पूतं भोज्यं च तद्भवेत्'' परा० । द्रोणन्यूनपरिमाणस्यान्नस्य श्वाद्यवलेह्महोपघातदूषितस्य त्याग एव कर्त्तव्यः यथाह स एव । ''श्वकाकशृगालाद्यैस्तु जग्धमन्नं यदा भवेत् । स्नेहो वा गोरसोवापि तत्र शुद्धिः कथं भवेत् ? । अन्नं परित्यजेत्तत्र स्नेहस्य पावनेन तु । अस्वस्तनतया शुद्धिर्गोरसस्य विधीयते । तत्रैव विषये देवलः ''अवलीढं श्वमार्जारधाङ्क्षकुक्कुटमूषिकैः । भोजने नोपयुञ्जीत तदमेध्यं हि सर्व्वतः'' चण्डालादिस्पृष्टस्य द्रोणाधिकस्यापि त्यागएव कार्य्य इत्याह ''चण्डालेन शुना वापि दुष्टमन्नमयज्ञियम् । चण्डालादिभिरुच्छिष्टैः स्पृष्टं भूयोऽपि वर्जयेत्'' वसिष्ठः । तत्रापवादः देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च । काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्ज्जयेत् । तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति'' द्रवाणां प्लावनेनैव घृतानां प्रोक्षणेन च । छागेन मुखसंस्पृष्टं शुचि त्वेव हि तद्भवेत्'' वृह० ''तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरे ग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति । गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः । अमीमांस्यानि शौचानि स्त्रीभिराचरितानि च'' वृह० ''कन्दुपक्वानि तैलानि पायसं दधि सक्तवः । एतान्यशूद्रान्नभुजोभोज्यानि मनुरब्रवीत्'' शाता० । द्रव्यविशेषे या शुद्धिरुक्ता सान्नान्तरसम्पादनाशक्तिरूपाया मापद्येव कार्य्या । अनापदि तु दुष्टमन्नं परित्यज्यान्नान्तरं संपाद्यम् यथोक्तं वायुपु० । ''अन्नं पश्येयुरेते तु यदि वै हव्यकव्ययोः । उत्सृज्य तद्धव्यं प्रधानार्थं संस्कारस्त्वापदि स्मृतः'' ''हविषां संस्कृतानान्तु मुख्यमेव विवर्जनम् । स्मृतप्रयुक्ताभिरद्भिर्वा प्रोक्षणं तु विधीयते । सिद्धार्थकैः कृष्णतिलैः कार्य्यं वाप्यवकीरणम् । द्विजसूर्य्याग्निवस्तानां दर्शनं तु प्रयत्नतः'' ब्रह्मपु० । अथोदकशुद्धशुद्ध्युपायाः । ''उच्छिष्टं मलिनं क्लिन्नं यच्च विष्ठानुलेपितम्'' इत्युपक्रम्य ''सूर्य्येन्दुरश्मिपातेन मारुतस्पर्शनेन च । गवां मूत्रपुरीषेण शुध्यन्त्यापः इति स्थितिः'' वृह० । ''मृतपञ्चनखात् कूपादत्यन्तोपहतास्तथा । अपः समुद्धरेत् सर्व्वाः शेषं वस्त्रेण शोधयेत्'' । वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते । पञ्चगव्यं न्यसेत् पश्चात् नवतोयसमुद्भवे । जलाशयेष्वथाल्पेषु स्थावरेषु महीतले । कूपवत् कथिता शुद्धिः महत्सु च न दूषणम्'' विष्णुः ''रथ्या कर्द्दमेत्यादिप्रागुक्तं ४८१पृ० ''भूमिस्थमुदकं पुण्यं वैतृष्ण्यं यत्र गोर्भवेत् । अव्याप्तं चेदमेध्येन तद्देव हि शोधनम्'' वापीकूपतड़ागेभ्य आपोग्राह्यास्तु सर्व्वशः । ''पश्चात् पश्येदमेध्यन्तु पञ्चगव्येन शुध्यति'' परा० ''अस्थिचर्म्मावसिक्तं यत् श्वमार्ज्जाराखुमूषिकैः । दूषितं यद्भवेत्तोयम्'' इत्युपक्रम्य ''अस्थिचर्म्मावपतितं खरवानरसूकरैः । उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् । वापीकूपतड़ागेषु दूषितेषु कथञ्चन । उद्धृत्य वै कुम्भशतं पञ्चगव्येन शुध्यति । खनिकूपतड़ागेषु संदिग्धेषु विशेषतः । तेभ्योहृत्वा घटशतं पञ्चगव्येन शुध्यति । पादुकोपानहिण्मूत्रं कूपे यदि निमज्जति । षष्टिं कुम्भान् समुद्धृत्य पञ्चगव्येन शुध्यति'' परा० अथ नानाद्रव्यशुद्ध्यशुद्धी ''श्वपाकोयत् स्पृशेद्द्रव्यं मृण्मयं द्रवमेव वा । पक्वं वा भोज्यं कल्कं वा तत् सर्वं परिवर्जयेत् उच्छिष्टाशुचिभिः स्पृष्टमद्रवं शोध्यतेऽम्भसा'' जनं वापि प्रभूतं वा शोधयेत् प्रोक्षणादिभिः देव० । तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य च । भस्मनाद्भिर्म्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥ निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति । अब्जमश्ममयञ्चैव राजतञ्चानुपस्कृतम् ॥ अपामग्नेश्च संयोगाद्धैमरूप्यञ्च संबभौ । तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ॥ ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च । शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः ॥ द्रवाणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लावनं स्मृतम् । प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥ मार्ज्जनं यज्ञपात्राणां पाणिना यज्ञकर्म्मणि । चमसानां ग्रहाणाञ्च शुद्धिः प्रक्षालनेन तु ॥ चरूणां स्रुक्स्रुवाणाञ्च शुद्धिरुष्णेन वारिणा । स्फ्यशूर्पशकटानाञ्च मुषलोलूखलस्य च ॥ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् । प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥ चेलवच्चर्म्मणां शुद्धिर्व्वैदलानान्तथैव च । शाकमूलफलानाञ्च धान्यवच्छुद्धिरिष्यते ॥ कौशेयाविकयोरूषैः कुतपानामरिष्टकैः । श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥ क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च । शुद्धिर्विजानता कार्य्या गोमूत्रेणोदकेन वा ॥ प्रोक्षणात्तृणकाष्ठञ्च पलालञ्चैव शुध्यति । मार्ज्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृण्मयम् ॥ मद्यैर्मूत्रैः पुरीषैर्व्वा ष्ठीवनैः पूयशोणितैः । यावन्नापैत्यमेध्याक्ताद्गन्धोलेपश्च तत्कृतः । तावन्मृद्वारि चादेयं सर्व्वासु द्रव्यशुद्धिषु'' मनुः ॥ 'कुसुम्भकुङ्कुमानां च जर्णाकर्पासयोस्तथा । प्रोक्षणादि तथा शुद्धिरित्याह भगवान् यमः'' शङ्खः ''तूलिकामुपधानानि पुष्परक्ताम्बराणि च । शोधयित्वातपे किञ्चित् करेण मार्ज-